वेदान्तडिण्डिमः

vedāntaḍiṇḍimaḥ

Camp – 1

from 16 to 23 February 2009

Swami Dayananda Ashram

Arsha Vidya Pitham

Purani Jhadi

Rishikesh-249201 (Uttarakhand)

Phone & Fax: 0135-2430769, 0135-2431769

e-mail ID < dayas1088@gmail.com

FOREWARD

The Vedanta Dindimah is one of the few Prakarana books of Vedanta that has a wide readership among the

students of Vedanta. The main reasons for its wide readership are that the book presents deeper principles of Vedanta in simple free flowing style, its gives clarity of vision and lastly it is pleasant to read dindimas repeatedly. But what is this DINDIMAH ? When a drum is played it gives the sound of dindimah. In this book out of 94 verses, dindimah is repeated 92 times at the end of each verse. But what is the dindimah of Vedanta? The dindimah is about the identity of individual jiva with all pervading reality Brahman. Thus the declaration or dindimah of Vedanta is about identity of individual with Brahman. This fact is presented with varied perspectives in the book.

Regarding the authorship of the book there are divergent views among the scholars. Some consider Shriman Narasimha Saraswati as its author. Others attribute authorship to Bahgvatpada Adi Sankara. But many scholars say that the style and depth of writings of Adi Sankara are unique and these could not be seen in this book. Who ever may be the author of the book, it is a good introductory book on Vedanta.

Pujya Swami Dayananda Saraswati is going to take this text in the camp organized at Dayananda Ashram Rishikesh from 16 to 23 February 2009. In the book in your hand, we have given first verse in Devanagari script and below it, its transliteration in Roman script. The text is given on left hand side of the book and a blank page is kept on right side for taking the notes. The lucid, consistent and exhaustive lectures of Pujya Swamiji will be more than a commentary on the text.

For any omission in the devnagari script or its transliteration our apologies to the reader. We will correct it if it is brought to our notice.

Swami Dayananda Ashram
Arsha Vidya Pitham,
Purani Jhadi
Rishikesh-249201 (Uttarakhhanda)
Website: www.dayananda.org

KEY TO TRANSLITERATION AND PRONUNCIATION

Sanskrit	English	Read as in	Sanskrit	English	Read as in
अ	*a*	*but*	ख्	*kh*♣	*blockhead*
आ	*ā*	*calm*	ग्	*g*	*gate*
इ	*i*	*sit*	घ्	*gh*♣	*loghut*
ई	*ī*	*beet*	ङ्	*ṅ*	*sing*
उ	*u*	*put*	च्	*c*♣	*chunk*
ऊ	*ū*	*pool*	छ्	*ch*♣	*catch him*
ऋ	*ṛ*	*rhythm*	ज्	*j*	*john*
ॠ	*ṝ*	*ṛ – elongated*	झ्	*jh*♣	*hedgehog*
ए	*e*	*tape*	ञ्	*ñ*	*bunch*
ऐ	*ai*	*high*	ट्	*ṭ*♣	*start*
ओ	*o*	*toe*	ठ्	*ṭh*♣	*anthill*
औ	*au*	*loud*	ड्	*ḍ*♣	*dart*
क्	*k*	*skate*	ढ्	*ḍh*♣	*godhead*

♣ *These do not have an equivalent sound in English.*

Sanskrit	English	Read as in	Sanskrit	English	Read as in
ण्	*ṇ*♣	*under*	य्	*y*	*young*
त्	*t*♣	*path*	र्	*r*	*drama*
थ्	*th*♣	*thunder*	ल्	*l*	*luck*
द्	*d*♣	*that*	व्	*v*	*avert*
ध्	*dh*♣	*breathe*	श्	*ś*[1]	*shove*
न्	*n*♣	*numb*	ष्	*ṣ*	*bushel*
प्	*p*	*spin*	स्	*s*	*so*
फ्	*ph*♣	*loophole*	ह्	*h*	*hum*
ब्	*b*	*bin*	अं	*ṃ*[2]	
भ्	*bh*♣	*abhor*	अः	*ḥ*[3]	
म्	*m*	*much*			

♣ *These do not have an equivalent sound in English.*

---

[1] *This has no equivalent in English. It is a palatal. It should be pronounced as in 'Śaṅkara.'*

[2] *This is called anusvāra, a nasal, derived either from a* म् *or a* न् *– independent, but incapable of being pronounced without a vowel preceding it. Hence, it is shown above with* अ *although its form is only a dot above the line.*

[3] *This is called visarga. The word visarga literally means letting out the breath from the mouth. It is pronounced as an aspirated sound. Like the anusvāra, the visrga is incapable of being independently uttered. Hence, it is written for convenience as* अः *although its form for writing purposes is only two dots (:) after the vowel preceding it.*

वेदान्तडिण्डिमः

vedāntaḍiṇḍimaḥ

श्री गणेशाय नमः॥

śrī gaṇeśāya namaḥ.

वेदान्तडिण्डिमास्तत्त्वमेकमुद्घोषयन्ति यत् ।

आस्तां पुरस्तात्तत्तेजो दक्षिणामूर्तिसंज्ञितम् ॥१॥

vedāntaḍiṇḍimāstattvamekamudghoṣayanti yat,

āstāṃ purastāttattejo dakṣiṇāmūrtisaṃjñitam. (1)

आत्मानात्मापदार्थौ द्वौ भोक्तृ-भोग्यत्वलक्षणौ।

ब्रह्मैवात्मा न देहादिरिति वेदान्तडिण्डिमः॥ २॥

ātmānātmāpadārthau dvau bhoktṛ-bhogyatvalakṣaṇau,

brahmaivātmā na dehādiriti vedāntaḍiṇḍimaḥ. (2)

ज्ञानाज्ञाने पदार्थौ द्वावात्मनो बन्धमुक्तिदौ।

ज्ञानान्मुक्तिर्निबन्धोऽन्यदिति वेदान्तडिण्डिमः॥ ३॥

jñānājñāne padārthau dvāvātmano bandhamuktidau,

jñānānmuktirnibandho'nyaditi vedāntaḍiṇḍimaḥ. (3)

ज्ञातृज्ञेयौ पदार्थौ द्वौ भास्यभासकलक्षणौ।

ज्ञातृ ब्रह्म जगद् ज्ञेयमिति वेदान्तडिण्डिमः॥ ४॥

jñātṛjñeyau padārtau dvau bhāsyabhāsakalakṣaṇau.

jñātṛ brahma jagad jñeyamiti vedāntaḍiṇḍimaḥ. (4)

सुखदुःखे पदार्थौ द्वौ प्रियविप्रियकारकौ।

सुखं ब्रह्म जगद् दुःखमिति वेदान्तडिण्डिमः॥ ५॥

sukhaduḥkhe padārthau dvau priyavipriyakārakau,

sukhaṃ brahma jagad duḥkhamiti vedāntaḍiṇḍimaḥ. (5)

समष्टिव्यष्टिरूपौ द्वौ पदार्थौ सर्वसम्मतौ।

समष्टिरीश्वरो व्यष्टिर्जीवो वेदान्तडिण्डिमः॥ ६॥

samaṣṭivyaṣṭirūpau dvau padārthau sarvasammatau,

samaṣṭirīśvaro vyaṣṭirjīvo vedāntaḍiṇḍimaḥ. (6)

ज्ञानं कर्म पदार्थौ द्वौ वस्तुकर्त्रात्मतन्त्रकौ।

ज्ञानान्मोक्षो न कर्मभ्य इति वेदान्तडिण्डिमः॥७॥

jñānaṃ karma padārthau dvau vastukartrātmatantrakau,

jñānānmokṣo na karmabhya iti vedāntaḍiṇḍimaḥ. (7)

श्रोतव्याश्राव्यरूपौ द्वौ पदार्थौ सुखदुःखदौ।

श्रोतव्यं ब्रह्म नैवान्यदिति वेदान्तडिण्डिमः॥८॥

śrotavyāśrāvyarūpau dvau padārthau sukhaduḥkhadau,

śrotavyaṃ brahma naivānyaditi vedāntaḍiṇḍimaḥ. (8)

चिन्त्याचिन्त्ये पदार्थौ द्वौ विश्रान्तिश्रान्तिदायकौ।

चिन्त्यं ब्रह्म परं नान्यदिति वेदान्तडिण्डिमः॥९॥

cintyācintye padārtau dvau viśrāntiśrāntidāyakau,

cintyaṃ brahma paraṃ nānyaditi vedāntaḍiṇḍimaḥ. (9)

ध्येयाध्येये पदार्थौ द्वौ धीसमाध्यसमाधिदौ।

ध्यातव्यं ब्रह्म नैवान्यदिति वेदान्तडिण्डिमः॥ १०॥

dhyeyādhyeye padārthau dvau dhīsamādhyasamādhidau,

dhyātavyaṃ brahma naivānyaditi vedāntaḍiṇḍimaḥ. (10)

योगिनो भोगिनो वापि त्यागिनो रागिणोऽपि च।

ज्ञानान्मोक्षो न सन्देह इति वेदान्तडिण्डिमः॥ ११॥

yogino bhogino vāpi tyāgino rāgiṇo'pi ca,

jñānānmokṣo na sandeha iti vedāntaḍiṇḍimaḥ. (11)

न वर्णाश्रमसङ्केतैर्न कर्मोपासनादिभिः ।

ब्रह्मज्ञानं विना मोक्ष इति वेदान्तडिण्डिमः॥ १२॥

na varṇāśramasaṅketairna karmopāsanādibhiḥ,

brahmajñānaṃ vinā mokṣa iti vedāntaḍiṇḍimaḥ. (12)

असत्यः सर्वसंसारो रसाभासादिदूषितः।

उपेक्ष्यो ब्रह्मविज्ञेयमिति वेदान्तडिण्डिमः॥१३॥

astyaḥ sarvasaṃsāro rasābhāsādidūṣitaḥ,

upekṣyo brahmavijñeyamiti vedāntaḍiṇḍimaḥ. (13)

वृथाक्रिया वृथालापान् वृथावादान् मनोरथान्।

त्यक्त्वैकं ब्रह्म विज्ञेयमिति वेदान्तडिण्डिमः॥१४॥

vṛthākriyā vṛthālāpān vṛthāvādān manorathān,

tyaktvaikaṃ brahma vijñeyamiti vedāntaḍiṇḍimaḥ. (14)

स्थितो ब्रह्मात्मना जीवो ब्रह्म जीवात्मना स्थितम्।

इति संपश्यतां मुक्तिरिति वेदान्तडिण्डिमः॥१५॥

sthito brahmātmanā jīvo brahma jīvātmanā sthitam,

iti saṃpaśyatāṃ muktiriti vedāntaḍiṇḍimaḥ. (15)

जीवो ब्रह्मात्मना ज्ञेयो ज्ञेयं जीवात्मना परम्।

मुक्तिस्तदैक्यविज्ञानमिति वेदान्तडिण्डिमः॥ १६॥

jīvo brahmātmanā jñeyo jñeyaṃ jīvātmanā param,

muktistadaikyavijñānamiti vedāntaḍiṇḍimaḥ. (16)

सर्वात्मना परं ब्रह्म श्रोतुरात्मतया स्थितम्।

नायासस्तत्त्वविज्ञप्ताविति वेदान्तडिण्डिमः॥ १७॥

sarvātmanā paraṃ brahma śroturātmatayā sthitam,

nāyāsastattvavijñaptāviti vedāntaḍiṇḍimaḥ. (17)

ऐहिकं चामुष्मिकं च तापान्तं कर्मसञ्चयम्।

त्यक्त्वा ब्रह्मैव विज्ञेयमिति वेदान्तडिण्डिमः॥ १८॥

aihikaṃ cāmuṣmikaṃ ca tāpāntaṃ karmasañcayaṃ,

tyaktvā brahmaiva vijñeyamiti vedāntaḍiṇḍimaḥ. (18)

अद्वैतद्वैतवादौ द्वौ सूक्ष्मस्थूलदशां गतौ।

अद्वैतवादान्मोक्षः स्यादिति वेदान्तडिण्डिमः॥ १९॥

advaitadvaitavādau dvau sūkṣmasthūladaśāṃ gatau,

advaitavādānmokṣaḥ syāditi vedāntaḍiṇḍimaḥ. (19)

कर्मिणो विनिवर्तन्ते निवर्तन्त उपासकाः।

ज्ञानिनो न निवर्तन्त इति वेदान्तडिण्डिमः॥ २०॥

karmiṇo vinivartante nivartanta upāsakāḥ,

jñānino na nivartanta iti vedāntaḍiṇḍimaḥ. (20)

परोक्षासत्फलं कर्म ज्ञानं प्रत्यक्षसत्फलम्।
ज्ञानमेवाभ्यसेत्तस्मादिति वेदान्तडिण्डिमः॥ २१।

parokṣāsatphalaṃ karma jñānaṃ pratyakṣasatphalam,

jñānamevābhyasettasmāditi vedāntaḍiṇḍimaḥ. (21)

वृथा श्रमोऽयं विदुषां वृथाऽयं कर्मिणां श्रमः।

यदि न ब्रह्मविज्ञानमिति वेदान्तडिण्डिमः॥ २२॥

vṛthā śramo'yaṃ viduṣāṃ vṛthā'yaṃ karmiṇāṃ śramaḥ,

yadi na brahmavijñānamiti vedāntaḍiṇḍimaḥ. (22)

अलं यागैरलं योगैरलं भोगैरलं धनैः।

परस्मिन् ब्रह्मणि ज्ञात इति वेदान्तडिण्डिमः॥ २३॥

alaṃ yāgairalaṃ yogairalaṃ bhogairalaṃ dhanaiḥ,

parasmin brahmaṇi jñāta iti vedāntaḍiṇḍimaḥ. (23)

अलं वेदैरलं शास्त्रैरलं स्मृतिपुराणकैः।

परमात्मनि विज्ञात इति वेदान्तडिण्डिमः॥ २४॥

alaṃ vedairalaṃ śāstrairalaṃ smṛtipurāṇakaiḥ,

paramātmani vijñāta iti vedāntaḍiṇḍimaḥ. (24)

नर्चा न यजुषार्थोऽस्ति न साम्नार्थोऽस्ति कश्चन।

जाते ब्रह्मात्मविज्ञान इति वेदान्तडिण्डिमः॥ २५॥

narcā na yajuṣārtho'sti na sāmnārtho'sti kaścana,

jāte brahmātmavijñāna iti vedāntaḍiṇḍimaḥ. (25)

कर्माणि चित्तशुद्ध्यर्थमैकाग्र्यार्थमुपासनम्।

मोक्षार्थं ब्रह्मविज्ञानमिति वेदान्तडिण्डिमः॥ २६॥

karmāṇi cittaśuddhyarthamaikāgryārthamupāsanam,

mokṣārthaṃ brahmavijñānamiti vedāntaḍiṇḍimaḥ. (26)

सञ्चितागामिकर्माणि दह्यन्ते ज्ञानवह्निना।

प्रारब्धानुभवान्मोक्ष इति वेदान्तडिण्डिमः॥ २७॥

sañcitāgāmikarmāṇi dahyante jnānavahninā

prārabdhānubhavānmokṣa iti vedāntaḍiṇḍimaḥ. (27)

न पुण्यकर्मणा वृद्धिर्न हानिः पापकर्मणा।

नित्यासङ्गात्मनिष्ठानामिति वेदान्तडिण्डिमः॥ २८॥

na puṇyakarmaṇā vṛddhirna hāniḥ pāpakarmaṇā,

nityāsaṅgātmaniṣṭhānāmiti vedāntaḍiṇḍimaḥ. (28)

दृग्दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ।

दृग्ब्रह्म दृश्यं माया स्यादिति वेदान्तडिण्डिमः॥ २९॥

dṛgdṛśyau dvau padārthau staḥ parasparavilakṣaṇau,

dṛgbrahma dṛśyaṃ māyā syāditi vedāntaḍiṇḍimaḥ. (29)

अविद्योपाधिको जीवो मायोपाधिक ईश्वरः।

मायाविद्यागुणातीत इति वेदान्तडिण्डिमः॥ ३०॥

avidyopādhiko jīvo māyopādhika īśvaraḥ,

māyāvidyāguṇātīta iti vedāntaḍiṇḍimaḥ. (30)

बुद्धिपूर्वाबुद्धिपूर्वकृतानां पापकर्मणाम्।

प्रायश्चित्तमहोज्ञानमिति वेदान्तडिण्डिमः॥ ३१॥

buddhipūrvābuddhipūrvakṛtānāṃ pāpakarmaṇām,

prāyaścittamahojñānamiti vedāntaḍiṇḍimaḥ. (31)

साकारं च निराकारं निर्गुणं च गुणात्मकम्।

तत्त्वं तत्परमं ब्रह्म इति वेदान्तडिण्डिमः॥ ३२॥

sākāraṃ ca nirākāraṃ nirguṇaṃ ca guṇātmakaṃ,

tattvaṃ tatparamaṃ brahma iti vedāntaḍiṇḍimaḥ. (32)

द्विजत्वं विध्यनुष्ठानाद् विप्रत्वं वेदपाठतः।

ब्रह्मण्यं ब्रह्मविज्ञानादिति वेदान्तडिण्डिमः॥ ३३॥

dvijatvaṃ vidhyanuṣṭhānād vipratvaṃ vedapāṭhataḥ,

brahmaṇyaṃ brahmavijñānāditi vedāntaḍiṇḍimaḥ. (33)

सर्वात्मना स्थितं ब्रह्म सर्वं ब्रह्मात्मना स्थितम्।

न कार्यं कारणाद्भिन्नमिति वेदान्तडिण्डिमः॥ ३४॥

sarvātmanā sthitaṃ brahma sarvaṃ brahmātmanā sthitam,

na kāryaṃ kāraṇādbhinnamiti vedāntaḍiṇḍimaḥ. (34)

सत्तास्फुरणसौख्यानि भासन्ते सर्ववस्तुषु।

तस्माद् ब्रह्ममयं सर्वमिति वेदान्तडिण्डिमः॥ ३५॥

sattāsphuraṇasaukhyāni bhāsante sarvavastuṣu,

tasmād brahmamayaṃ sarvamiti vedāntaḍiṇḍimaḥ. (35)

अवस्थात्रितयं यस्य क्रीडाभूमितया स्थितम्।

तदेव ब्रह्म जानीयादिति वेदान्तडिण्डिमः॥ ३६॥

avasthātritayaṃ yasya krīḍābhūmitayā sthitaṃ,

tadeva brahma jānīyāditi vedāntaḍiṇḍimaḥ. (36)

यन्नादौ यच्च नास्त्यन्ते तन्मध्ये भातमप्यसत्।

अतो मिथ्या जगत् सर्वमिति वेदान्तडिण्डिमः॥ ३७॥

yannādau yacca nāstyante tanmadhye bhātamapyasat,

ato mithyā jagat sarvamiti vedāntaḍiṇḍimaḥ. (37)

यदस्त्यादौ यदस्त्यन्ते यन्मध्ये भाति तत्स्वयम्।

ब्रह्मैवैकमिदं सत्यमिति वेदान्तडिण्डिमः॥ ३८॥

yadastyādau yadastyante yanmadhye bhāti tatsvayam,

brahmaivaikamidaṃ satyamiti vedāntaḍiṇḍimaḥ. (38)

पुरुषार्थत्रयाविष्टाः पुरुषाः पशवो ध्रुवम्।

मोक्षार्थी पुरुषः श्रेष्ठ इति वेदान्तडिण्डिमः॥ ३९॥

puruṣārthatrayāviṣṭāḥ puruṣāḥ paśavo dhruvam,

mokṣārthī puruṣaḥ śreṣṭha iti vedāntaḍiṇḍimaḥ. (39)

घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव च।

तथा ब्रह्म जगत्सर्वमिति वेदान्तडिण्डिमः॥ ४०॥

ghaṭakuḍyādikaṃ sarvaṃ mṛttikāmātrameva ca,

tathā brahma jagatsarvamiti vedāntaḍiṇḍimaḥ. (40)

षण्निहत्य त्रयं हित्वा द्वयं भित्वाऽखिलातिगम्।
एकं बुद्ध्वाऽश्नुते मोक्षमिति वेदान्तडिण्डिमः॥ ४१॥

ṣāṇnihatya trayaṃ hitvā dvayaṃ bhitvā'khilātigam,

ekaṃ buddhvā'śnute mokṣamiti vedāntaḍiṇḍimaḥ. (41)

भित्त्वा षट् पञ्च भित्त्वाऽथ भित्त्वाऽथ चतुरस्त्रिकम्।

द्वयं हित्वाऽऽश्रयेदेकमिति वेदान्तडिण्डिमः॥ ४२॥

bhittvā ṣaṭ pañca bhitvā'tha bhitvā'tha caturastrikam,

dvayaṃ hitvā''śrayedekamiti vedāntaḍiṇḍimaḥ. (42)

देहो नाहमहं देही (देवो) देहसाक्षीति निश्चयात्।

जन्ममृत्युप्रहीणोऽसाविति वेदान्तडिण्डिमः॥ ४३॥

deho nāhamahaṃ dehī (devo) dehasākṣīti niścayāt,

janmamṛtyuprahīṇo'sāviti vedāntaḍiṇḍimaḥ. (43)

प्राणो नाहमहं देवः प्राणसाक्षीति निश्चयात्।

क्षुत्पिपासोपशान्तिः स्यादिति वेदान्तडिण्डिमः॥ ४४॥

prāṇo nāhamahaṃ devaḥ prāṇasākṣīti niścayāt,

kṣutpipāsopaśāntiḥ syāditi vedāntaḍiṇḍimaḥ. (44)

मनो नाहमहं देवो मनः साक्षीति निश्चयात्।

शोकमोहापहानिः स्यादिति वेदान्तडिण्डिमः॥ ४५॥

mano nāhamahaṃ devo manaḥ sākṣīti niścayāt,

śokamohāpahāniḥ syāditi vedāntaḍiṇḍimaḥ. (45)

बुद्धिर्नाहमहं देवो बुद्धिसाक्षीति निश्चयात्।

कर्तृभावनिवृत्तिः स्यादिति वेदान्तडिण्डिमः॥ ४६॥

buddhirnāhamahaṃ devo buddhisākṣīti niścayāt,

kartṛbhāvanivṛttiḥ syāditi vedāntaḍiṇḍimaḥ. (46)

नाज्ञानं स्यामहं देवोऽज्ञानसाक्षीति निश्चयात्।

सर्वानर्थनिवृत्तिः स्यादिति वेदान्तडिण्डिमः॥ ४७॥

nājñānaṃ syāmahaṃ devo'jñānasākṣīti niścayāt,

srvānarthanivṛttiḥ syāditi vedāntaḍiṇḍimaḥ. (47)

अहं साक्षीति यो विद्याद्विविच्यैवं पुनः पुनः।
स एव मुक्तोऽसौ विद्वानिति वेदान्तडिण्डिमः॥ ४८॥

ahaṃ sākṣīti yo vidyādvivicyaivaṃ punaḥ punaḥ,

sa eva mukto'sau vidvāniti vedāntaḍiṇḍimaḥ. (48)

नाहं माया न तत्कार्यं न साक्षी परमोऽस्म्यहम्।

इति निस्संशयज्ञानान्मुक्तिर्वेदान्तडिण्डिमः॥ ४९॥

nāhaṃ māyā na tatkāryaṃ na sākṣī paramo'smyahaṃ,

iti nissaṃśayajñānānmuktirvedāntaḍiṇḍimaḥ. (49)

नाहं सर्वमहं सर्वं मयि सर्वमिति स्फुटम्।

ज्ञाते तत्त्वे कुतो दुःखमिति वेदान्तडिण्डिमः॥ ५०॥

nāhaṃ sarvamahaṃ sarvaṃ mayi sarvamiti sphuṭam,

jñāte tattve kuto duḥkhamiti vedāntaḍiṇḍimaḥ. (50)

देहादिपञ्चकोशस्था या सत्ता प्रतिभासते।

सा सत्तात्मा न सन्देह इति वेदान्तडिण्डिमः॥ ५१॥

dehādipañcakośasthā yā sattā pratibhāsate,

sā sattātmā na sandeha iti vedāntaḍiṇḍimaḥ. (51)

देहादिपञ्चकोशस्था या स्फूर्तिरनुभूयते।

सा स्फूर्तिरात्मा नैवान्यदिति वेदान्तडिण्डिमः॥५२॥

dehādipañcakośasthā yā sphūrtiranubhūyate,

sā sphūrtirātmā naivānyaditi vedāntaḍiṇḍimaḥ. (52)

देहादिपञ्चकोशस्था या प्रीतिरनुभूयते।

सा प्रीतिरात्मा कूटस्थ इति वेदान्तडिण्डिमः॥५३॥

dehādipañcakośasthā yā prītiranubhūyate,

sā prītirātmā kūṭastha iti vedāntaḍiṇḍimaḥ. (53)

व्योमादिपञ्चभूतस्था या सत्ता भासते नृणाम्।

सा सत्ता परमं ब्रह्म इति वेदान्तडिण्डिमः॥५४॥

vyomādipañcabhūtasthā yā sattā bhāsate nṛṇām,

sā sattā paramaṃ brahma iti vedāntaḍiṇḍimaḥ. (54)

व्योमादिपञ्चभूतस्था या चिदेकानुभूयते।

सा चिदेव परं ब्रह्म इति वेदान्तडिण्डिमः॥ ५५॥

vyomādipañcabhūtasthā yā cidekānubhūyate,

sā cideva paraṃ brahma iti vedāntaḍiṇḍimaḥ. (55)

व्योमादिपञ्चभूतस्था या प्रीतिरनुभूयते।

सा प्रीतिरेव ब्रह्म स्यादिति वेदान्तडिण्डिमः॥ ५६॥

vyomādipañcabhūtasthā yā prītiranubhūyate,

sā prītireva brahma syāditi vedāntaḍiṇḍimaḥ. (56)

देहादिकोशगा सत्ता या सा व्योमादिभूतगा।

मानाभावान्न तद्भेद इति वेदान्तडिण्डिमः॥ ५७॥

dehādikośagā sattā yā sā vyomādibhūtagā,

mānābhāvānna tadbheda iti vedāntaḍiṇḍimaḥ. (57)

देहादिकोशगा स्फूर्तिर्या सा व्योमादिभूतगा।

मानाभावान्न तद्भेद इति वेदान्तडिण्डिमः॥ ५८॥

dehādikośagā sphūrtiryā sā vyomādibhūtagā,

manābhāvānna tadbheda iti vedāntaḍiṇḍimaḥ. (58)

देहादिकोशगा प्रीतिर्या सा व्योमादिभूतगा।

मानाभावान्न तद्भेद इति वेदान्तडिण्डिमः॥ ५९॥

dehādikośagā prītiryā sā vyomādibhūtagā,

mānābhāvānna tadbheda iti vedāntaḍiṇḍimaḥ. (59)

सच्चिदानन्दरूपत्वाद्ब्रह्मैवात्मा न संशयः।

प्रमाणकोटिसन्धानादिति वेदान्तडिण्डिमः॥ ६०॥

saccidānandarūpatvādbrahmaivātmā na saṃśayaḥ,

pramāṇakoṭisandhānāditi vedāntaḍiṇḍimaḥ. (60)

न जीवब्रह्मणोर्भेदः सत्तारूपेण विद्यते।

सत्ताभेदे न मानं स्यादिति वेदान्तडिण्डिमः॥ ६१॥

na jīvabrahmaṇorbhedaḥ sattārūpeṇa vidyate,

sattābhede na mānaṃ syāditi vedāntaḍiṇḍimaḥ. (61)

न जीवब्रह्मणोर्भेदः स्फूर्तिरूपेण विद्यते।

स्फूर्तिभेदे न मानं स्यादिति वेदान्तडिण्डिमः॥ ६२॥

na jīvabrahmaṇorbhedaḥ sphūrtirūpeṇa vidyate,

sphūrtibhede na mānaṃ syāditi vedāntaḍiṇḍimaḥ. (62)

न जीवब्रह्मणोर्भेदः प्रियरूपेण विद्यते।

प्रियभेदे न मानं स्यादिति वेदान्तडिण्डिमः॥ ६३॥

na jīvabrahmaṇorbhedaḥ priyarūpeṇa vidyate,

priyabhede na mānaṃ syāditi vedāntaḍiṇḍimaḥ. (63)

न जीवब्रह्मणोर्भेदो नाम्ना रूपेण विद्यते।

नाम्नो रूपस्य मिथ्यात्वादिति वेदान्तडिण्डिमः॥ ६४॥

na jīvabrahmaṇorbhedo nāmnā rūpeṇa vidyate,

nāmno rūpasya mithyātvāditi vedāntaḍiṇḍimaḥ. (64)

न जीवब्रह्मणोर्भेदः पिण्डब्रह्माण्डभेदतः।

व्यष्टेः समष्टेरेकत्वादिति वेदान्तडिण्डिमः॥ ६५॥

na jīvabrahmaṇorbhedaḥ piṇḍabrahmāṇḍabhedataḥ,

vyaṣṭeḥ samaṣṭerekatvāditi vedāntaḍiṇḍimaḥ. (65)

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।

जीवन्मुक्तस्तु तद्विद्वानिति वेदान्तडिण्डिमः॥ ६६॥

brahma satyaṃ jaganmithyā jīvo brahmaiva nāparaḥ,

jīvanmuktastu tadvidvāniti vedāntaḍiṇḍimaḥ. (66)

न नामरूपे नियते सर्वत्र व्यभिचारतः।

अनात्मरूपं सर्वं स्यादिति वेदान्तडिण्डिमः॥ ६७॥

na nāmarūpe niyate sarvatra vyabhicārataḥ,

anātmarūpaṃ sarvaṃ syāditi vedāntaḍiṇḍimaḥ. (67)

अनामरूपं सकलं सन्मयं चिन्मयं परम्।

कुतो भेदः कुतो बन्ध इति वेदान्तडिण्डिमः॥ ६८॥

anāmarūpaṃ sakalaṃ sanmayaṃ cinmayaṃ param,

kuto bhedaḥ kuto bandha iti vedāntaḍiṇḍimaḥ. (68)

न तत्त्वात् कथ्यते लोको नामाद्यैर्व्यभिचारतः।

बटुर्जरठ इत्याद्यैरिति वेदान्तडिण्डिमः॥ ६९॥

na tattvāt kathyate loko nāmādyairvyabhicārataḥ,

baṭurjaraṭha ityādyairiti vedāntaḍiṇḍimaḥ. (69)

नामरूपात्मकं विश्वमिन्द्रजालं विदुर्बुधाः।

अनात्मत्वादयुक्तत्वादिति वेदान्तडिण्डिमः॥ ७०॥

nāmarūpātmakaṃ viśvamindrajālaṃ vidurbudhāḥ,

anātmatvādayuktatvāditi vedāntaḍiṇḍimaḥ. (70)

अभेददर्शनं मोक्षः संसारो भेददर्शनम्।

सर्ववेदान्तसिद्धान्त इति वेदान्तडिण्डिमः॥ ७१॥

abhedadarśanaṃ mokṣaḥ saṃsāro bhedadarśanam,

sarvavedāntasiddhānta iti vedāntaḍiṇḍimaḥ. (71)

न मताभिनिवेशित्वान्न भाषावेशमात्रतः।

मुक्तिर्विनात्मविज्ञानादिति वेदान्तडिण्डिमः॥ ७२॥

na matābhiniveśitvānna bhāṣāveśamātrataḥ,

muktirvinātmavijñānāditi vedāntaḍiṇḍimaḥ. (72)

न काम्यप्रतिषिद्धाभिः क्रियाभिर्मोक्षवासना।

ईश्वरानुग्रहात्सा स्यादिति वेदान्तडिण्डिमः॥ ७३॥

na kāmyapratiṣiddhābhiḥ kriyābhirmokṣavāsanā,

īśvarānugrahātsā syāditi vedāntaḍiṇḍimaḥ. (73)

अविज्ञाते जन्म नष्टं विज्ञाते जन्म सार्थकम्।

ज्ञातुरात्मा न दूरे स्यादिति वेदान्तडिण्डिमः॥ ७४॥

avijñāte janma naṣṭaṃ vijñāte janma sārthakam,

jñāturātmā na dūre syāditi vedāntaḍiṇḍimaḥ. (74)

दशमस्य परिज्ञाने नायासोऽस्ति यथा तथा।

स्वस्य ब्रह्मात्मविज्ञाने इति वेदान्तडिण्डिमः॥ ७५॥

daśamasya parijñāne nāyāso'sti yathā tathā,

svasya brahmātmavijñāne iti vedāntaḍiṇḍimaḥ. (75)

उपेक्ष्यौपाधिकान् दोषान् गृह्यन्ते विषया यथा।

उपेक्ष्य दृश्यं यद् ब्रह्म इति वेदान्तडिण्डिमः॥ ७६॥

upekṣyaupādhikān doṣān gṛhyante viṣayā yathā,

upekṣya dṛśyaṃ yad brahma iti vedāntaḍiṇḍimaḥ. (76)

सुखमल्पं बहुक्लेशो विषयग्राहिणां नृणाम्।

अनन्तं ब्रह्मनिष्ठानामिति वेदान्तडिण्डिमः॥ ७७॥

sukhamalpaṃ bahukleśo viṣayagrāhiṇāṃ nṛṇām,

anantaṃ brahmaniṣṭhānāmiti vedāntaḍiṇḍimaḥ. (77)

धनैर्वा धनदैः पुत्रैर्दारागारसहोदरैः।

ध्रुवं प्राणहरैर्दुःखमिति वेदान्तडिण्डिमः॥ ७८॥

dhanairvā dhanadaiḥ putrairdārāgārasahodaraiḥ,

dhruwaṃ prāṇaharairduḥkhamiti vedāntaḍiṇḍimaḥ. (78)

सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम्।

नातिदूरे नृणां मृत्युरिति वेदान्तडिण्डिमः॥ ७९॥

supterutthāya suptyantaṃ brahmaikaṃ pravicintyatām

nātidūre nṛṇāṃ mṛtyuriti vedāntaḍiṇḍimaḥ. (79)

पञ्चानामपि कोशानां मायानर्थव्ययोचिता।

तत्साक्षीब्रह्मविज्ञानमिति वेदान्तडिण्डिमः॥ ८०॥

pañcānāmapi kośānāṃ māyānarthavyayocitā,

tatsākśībrahmavijñānamiti vedāntaḍiṇḍimaḥ. (80)

दशमत्वपरिज्ञाने नवज्ञस्य यथासुखम्।

तथा जीवस्य सत्प्राप्ताविति वेदान्तडिण्डिमः॥ ८१॥

daśamatvaparijñāne navajñasya yathāsukhaṃ,

tathā jīvasya satprāptāviti vedāntaḍiṇḍimaḥ. (81)

नवभ्योऽस्ति परं प्रत्यङ् न वै वेद परं परम्।

तद्विज्ञानाद्भवेत्तुर्या मुक्तिर्वेदान्तडिण्डिमः॥ ८२॥

navabhyo'sti paraṃ pratyaṅ na vai veda paraṃ param,

tadvijñānādbhavetturyā muktirvedāntaḍiṇḍimaḥ. (82)

नवाभासानवज्ञत्वान्नवोपाधीन्नवात्मना।

मिथ्या ज्ञात्वाऽवशिष्टे तु मौनं वेदान्तडिण्डिमः॥ ८३॥

navābhāsānavajñatvānnavopādhīnnavātmanā,

mithyā jñātvā'vaśiṣṭe tu maunaṃ vedāntaḍiṇḍimaḥ. (83)

परमे ब्रह्मणि स्वस्मिन् प्रविलाप्याखिलं जगत्।

गायन्नद्वैतमानन्दमास्ते वेदान्तडिण्डिमः॥ ८४॥

parame brahmaṇi svasmin pravilāpyākhilaṃ jagat,

gāyannadvaitamānandamāste vedāntaḍiṇḍimaḥ. (84)

प्रतिलोमानुलोमाभ्यां विश्वारोपापवादयोः।

चिन्तने शिष्यते तत्त्वमिति वेदान्तडिण्डिमः॥ ८५॥

pratilomānulomābhyāṃ viśvāropāpavādayoḥ,

cintane śiṣyate tattvamiti vedāntaḍiṇḍimaḥ. (85)

नामरूपाभिमानः स्यात् संसारः सर्वदेहिनाम्।

सच्चिदानन्ददृष्टिः स्यान्मुक्तिर्वेदान्तडिण्डिमः॥ ८६॥

nāmarūpābhimānaḥ syāt saṃsāraḥ sarvadehinām,

saccidānandadṛṣṭiḥ syānmuktirvedāntaḍiṇḍimaḥ. (86)

सच्चिदानन्दसत्यत्वे मिथ्यात्वे नामरूपयोः।

विज्ञाते किमिदं ज्ञेयमिति वेदान्तडिण्डिमः॥८७॥

saccidānandasatyatve mithyātve nāmarūpayoḥ,

vijñāte kimidaṃ jñeyamiti vedāntaḍiṇḍimaḥ. (87)

सालम्बनं निरालम्बं सर्वालम्बावलम्बितम्।

आलम्बेनाखिलालम्बमिति वेदान्तडिण्डिमः॥८८॥

sālambanaṃ nirālambaṃ sarvālambāvalambitam,

ālambenākhilālambamiti vedāntaḍiṇḍimaḥ. (88)

न कुर्यान्न विजानीयात् सर्वं ब्रह्मेत्यनुस्मरन्।

यथा सुखं तथा तिष्ठेदिति वेदान्तडिण्डिमः॥८९॥

na kuryānna vijānīyāt sarvaṃ brahmetyanusmaran,

yathā sukhaṃ tatha tiṣṭhediti vedāntaḍiṇḍimaḥ. (89)

स्वकर्मपाशवशगः प्राज्ञोऽन्यो वा जनो ध्रुवम्।

प्राज्ञः सुखं नयेत् कालमिति वेदान्तडिण्डिमः॥९०॥

svakarmapāśavaśagaḥ prājño'nyo vā jano dhruvam,

prājñaḥ sukhaṃ nayet kālamiti vedāntaḍiṇḍimaḥ. (90)

न विद्वान् सन्तपेच्चित्तं करणाकरणो ध्रुवम्।

सर्वमात्मेति विज्ञानादिति वेदान्तडिण्डिमः॥९१॥

na vidvān santapeccittaṃ karaṇākaraṇo dhruvaṃ,

sarvamātmeti vijñānāditi vedāntaḍiṇḍimaḥ. (91)

नैवाभासं स्पृशेत्कर्म मिथ्योपाधिमपि स्वयम्।

कुतोऽधिष्ठानमत्यच्छमिति वेदान्तडिण्डिमः॥९२॥

naivābhāsaṃ spṛṣetkarma mithyopādhimapi svayaṃ,

kuto'dhiṣṭhānamatyacchamiti vedāntaḍiṇḍimaḥ. (92)

अहोऽस्माकमलं मोहैरात्मा ब्रह्मेति निर्भयम्।

श्रुतिभेरीरवोऽद्यापि श्रूयते श्रुतिरञ्जनः॥९३॥

aho'smākamalaṃ mohairātmā brahmeti nirbhayaṃ,

śrutibherīravo'dyāpi śrūyate śrutirañjanaḥ. (93)

वेदान्तभेरीझङ्कारः प्रतिवादिभयङ्करः।

श्रूयतां ब्राह्मणैः श्रीमद्दक्षिणामूर्त्यनुग्रहात्।। ९४।।

vedāntabherījhaṅkāraḥ prativādibhayaṅkaraḥ,

śrūyatāṃ brāhmanaiḥ śrīmaddakṣiṇāmūrtyanugrahāt. (94)

।। ओम् तत् सत् ।।

om tat sat.